# Shri ShivashaktikritaM GanAdhishastotram

# શ્રીગણાધીશસ્તોત્રં શિવશક્તિકૃતમ્

## Document Information

Text title : Shivashaktikritam Ganadhishastotram

File name : shivashaktikRitaMgaNAdhIshastotram.itx

Category : ganesha, stotra, aShTaka

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P. Amith K Nagaraj)

Proofread by : Karthik Chandan.P, Amith K Nagaraj

Description-comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 63 | 2.63 15-27||

Latest update : March 9, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

June 1, 2024

*sanskritdocuments.org*

# શ્રીગણાધીશસ્તોત્રં શિવશક્તિકૃતમ્

શ્રીગણેશાય નમઃ ।
શ્રીશક્તિશિવાવૂચતુઃ ।
નમસ્તે ગણનાથાય ગણાનાં પતયે નમઃ ।
ભક્તિપ્રિયાય દેવેશ ભક્તેભ્યઃ સુખદાયક ॥ ૧॥

સ્વાનન્દવાસિને તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
નાભિશેષાય દેવાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૨॥

વરદાભયહસ્તાય નમઃ પરશુધારિણે ।
નમસ્તે સૃણિહસ્તાય નાભિશેષાય તે નમઃ ॥ ૩॥

અનામયાય સર્વાય સર્વપૂજ્યાય તે નમઃ ।
સગુણાય નમસ્તુભ્યં બ્રહ્મણે નિર્ગુણાય ચ ॥ ૪॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે ચ ગજાનન નમોઽસ્તુ તે ।
આદિપૂજ્યાય જ્યેષ્ઠાય જ્યેષ્ઠરાજાય તે નમઃ ॥ ૫॥

માત્રે પિત્રે ચ સર્વેષાં હેરમ્બાય નમો નમઃ ।
અનાદયે ચ વિઘ્નેશ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૬॥

વિઘ્નહર્ત્રે સ્વભક્તાનાં લમ્બોદર નમોઽસ્તુ તે ।
ત્વદીયભક્તિયોગેન યોગીશાઃ શાન્તિમાગતાઃ ॥ ૭॥

કિં સ્તુવો યોગરૂપં તં પ્રણમાવશ્ચ વિઘ્નપમ્ ।
તેન તુષ્ટો ભવ સ્વામિન્નિત્યુક્ત્વા તં પ્રણેમતુઃ ॥ ૮॥

તાવુત્થાપ્ય ગણાધીશ ઉવાચ તૌ મહેશ્વરૌ ।
(ફલશ્રુતિઃ ।)
શ્રીગણેશ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં મમ ભક્તિવિવર્ધનમ્ ॥ ૯॥

ભવિષ્યતિ ચ સૌખ્યસ્ય પઠતે શૃણ્વતે પ્રદમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈવ પુત્રપૌત્રાદિકં તથા ॥ ૧૦॥

ધનધાન્યાદિકં સર્વં લભતે તેન નિશ્ચિતમ્ ।
વરં ચ વદતં દેવૌ પ્રસન્નોઽહં દદામિ તમ્ ।
ભવતોર્ભક્તિભાવેન વિભુઃ સ્તોત્રેણ તોષિતઃ ॥ ૧૧॥

શક્તિશિવાવૂચતુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા નૌ પુત્રતાં યાહિ કૃતકૃત્યૌ તયા વિભો ॥ ૧૨॥

ભક્તિં દેહિ દૃઢાં દેવ ત્વદીયે પાદપઙ્કજે ।
દુર્મતિં જહિ વિઘ્નેશ ત્રૈલોક્યં ચ સુખીકુરુ ॥ ૧૩॥

ઇતિ શિવશક્તિકૃતં શ્રીગણાધીશસ્તોત્રં સમાપ્તમ્ ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૬૩ । ૨૬૩। ૧૫-૨૭॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 63 . 263. 15-27..

Encoded and proofread by
Karthik Chandan.P and Amith K Nagaraj

*Shri ShivashaktikritaM GanAdhishastotram*
pdf was typeset on June 1, 2024

Please send corrections to *sanskrit@cheerful.com*